# S-221090–A / S-221512–A

## विषय : संस्कृत

समय : 3 घण्टे ] [ पूर्णांक : 75

**निर्देश** : (*i*) सर्वे प्रश्नाः समाधेयाः।
(*ii*) सुन्दरं सुस्पष्टञ्च उत्तरं लिखत।

**प्रश्न-1** ( अ ) उचितं विकल्पं चित्वा लिखत— [1×5=5]

(*i*) भाषायाः आधारभूतं भवति—

( *क*) काव्यम्

( *ख*) नाटकम्

( *ग*) व्याकरणम्

( घ) महाकाव्यम्

(*ii*) वन्यफलानि संग्रहणार्थं गच्छति स्म—

( *क*) माला

( *ख*) विलासा

( *ग*) ममता

( घ) ललिता

(*iii*) 'मह्यम्' इति पदे वचनम् अस्ति—

(क) द्विवचनम्

(ख) वचनरहितम्

(ग) बहुवचनम्

(घ) एकवचनम्

(*iv*) '<u>सञ्जयः</u> उवाच' रेखांकित पदे सन्धिः अस्ति—

(क) पर सवर्ण सन्धिः

(ख) अनुस्वार सन्धिः

(ग) अशत्व सन्धिः

(घ) रुत्व विसर्ग सन्धिः

(*v*) 'निश्चिनोति' इत्यत्र उपसर्गः वर्तते—

(क) निश्

(ख) निस्

(ग) निश्चि

(घ) नि

(च) उचितं विकल्पं चित्वा रिक्त स्थानानि पूरयत— [1×5]

(विहाय, कामये, चलतु, परिधाय, शिष्यः)

(*i*) तर्हि भवान् ——।

(*ii*) न त्वहं —— राज्यम्।

(*iii*) नववस्त्राणि —— पूजनं करिष्यामि।

(*iv*) सः वसयानं —— पदातिरेव गतवान्।

(*v*) पादं —— स्वमेधया।

| | (क) | | (ख) |
|---|---|---|---|
| (*i*) | औद्योगिक: | - | प्रदेशे |
| (*ii*) | अग्नये | - | सप्तमी विभक्ति |
| (*iii*) | विजने | - | वद |
| (*iv*) | सर्वदा सत्यं | - | ठक् |
| (*v*) | 'कुशलः, निपुणः प्रवीणः' योग्ये | - | स्वाहा |

**प्रश्न-2** निम्नरेखाङ्कित पदयोः सन्धिविच्छेदं कृत्वा नाम्नी लिखत— [1×2=2]

(*क*) सः <u>चिदानन्देन</u> सह वार्तां करोति।

(*ख*) बालिका <u>मधुरगीतम् गायति</u>।

**प्रश्न-3** अधः प्रदत्ते संख्ये संस्कृतभाषया लिखत— [1×2=2]

(*क*) 147

(*ख*) 123

**प्रश्न-4** निम्नरेखाङ्कित पदयोः प्रकृति-प्रत्ययंच योजयित्वा लिखत— [1×2=2]

(*क*) तस्य <u>महत् + त्व</u> को न जानाति।

(*ख*) मम मातुः नाम <u>श्रीमत् + ङीप्</u> लता अस्ति।

**प्रश्न-5** अधोलिखित पदयोः उपसर्गं चित्वा लिखत— [1×2=2]

(*क*) अनुभवामि

(*ख*) परिहरति

प्रश्न-6 वाच्यमवबुध्य नाम लिखत— [1

(क) रमया भोजनं पच्यते।

(ख) सर्पा: पवनं पिबन्ति।

(ग) कन्याभि: हस्यते।

प्रश्न-7 समास-विग्रहं कृत्वा नामानि लिखत— [1×3

(क) बालका:

(ख) चन्द्रमुखी

(ग) पञ्चपात्रम्

प्रश्न-8 निर्देशानुसारं लकार परिवर्तनं कृत्वा लिखत— [1×3=3

(क) लता लेखं लिखति (लङ्लकारे)

(ख) वयं न क्रुध्याम (लृट्लकारे)

(ग) ते नृत्यन्तु (लट्लकारे)

प्रश्न-9 अधोलिखितं श्लोकं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [3]

नास्ति विद्यासमं चक्षुः नास्ति सत्यसमं तपः।

नास्ति रागसमं दुःखं नास्ति त्यागसमं सुखम्॥

*प्रश्ना:*

(क) 'नास्ति सत्यसमं तप:' वाक्यस्य हिन्दी भाषया अर्थं लिखत।

(ख) 'अस्ति' इति पदस्य श्लोके विलोमपदं लिखितम्।

(ग) 'चक्षु:' इति पदस्य पर्यायपदं लिखत।

**प्रश्न-10** अधोलिखित श्लोकस्य हिन्दीभाषया अर्थं लिखत— [3]

तपः स्वधर्म वर्तित्वं मनसो दमनं दमः ।

क्षमा द्वन्द्व सहिष्णुत्वं ह्रीरकार्य निवर्तनम् ॥

**प्रश्न-11** अधोलिखितं गद्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत— [3]

स्वामी विवेकानन्दः रायपुरे द्विवर्षपर्यन्तं समयं व्यतीतवान्। येन इदं नगरं परिपूतमभवत्। स्वामी विवेकानन्दस्य जन्मशताब्दी वर्षे भव्यं स्मारकं निर्मातुं सः आत्मानन्दः प्राणपणेनायतत्। अयम् आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति।

प्रश्नाः

(क) कः प्राणापणेनायतत्? (एक वाक्येन उत्तरत)

(ख) केन इदं नगरं परिपूतमभवत्? (पूर्णवाक्येन उत्तरत)

(ग) 'अयं आश्रमः आध्यात्मिकदर्शनस्य केन्द्रमस्ति' इति वाक्ये क्रियापदमस्ति?

**प्रश्न-12** अधोलिखितं गद्यांशं हिन्दीभाषया अनुवादं कुरुत—

बिलासा स्वप्रयत्नेन ग्रामस्य विकासः कृतवती। तस्याः वर्धमानं प्रभावं दृष्ट्वा प्रतिवेशिनः राज्यानि तस्याः क्षेत्रे आक्रमणं कृतवन्तः। तैः सह बिलासा साहसेन युद्धम् अकरोत्। सा राज्यरक्षा कुर्वती वीरगतिं प्राप्तवती। राजा कल्याणसायः मत्स्याखेटकानां निवासस्थलं बिलासायाः सम्मानार्थं बिलासपुरम् इति नाम्ना प्रथितम्।

**प्रश्न-13** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि संस्कृतभाषया लिखत— [1×4=4]

(क) पुत्रं द्रष्टुं कः प्रस्थितः?

(ख) मङ्गलयानस्य मार्गः कतिधा परिवर्तितः?

(ग) कस्मात् पादम् आदत्ते?

(घ) केषां शोधकाः वृक्षाः?

(ङ) अस्माकं कर्तव्यं किम्?

**प्रश्न-14** अधोलिखितेषु चतुर्णां प्रश्नानामुत्तराणि हिन्दीभाषया लिखत— [1×4=4]

(क) मत्स्यपालनक्षेत्रे कः पुरस्कारः दीयते?

(ख) लाभानामुत्तमं किम्?

(ग) वृक्षाः प्राणिनां कथम् उपकुर्वन्ति?

(घ) कः न्यायाधीशः आसीत् ?

(ङ) दीपमालिकापर्वणि कस्य शब्दः श्रूयते ?

प्रश्न-15 स्वपाठ्यपुस्तकात् चतस्रः सूक्तीः लिखत याः अस्मिन् प्रश्नपत्रे नागताः। [1×4=4]

प्रश्न-16 स्वपाठ्यपुस्तकात् कौचित् द्वौ श्लोकौ लिखत यौ अस्मिन् प्रश्नपत्रे नागतौ। [2½×2=5]

प्रश्न-17 (अ) भवत्या नाम मनोरमा अस्ति। भवती स्वमातुलस्य परिणयोत्सवे ग्रामं गन्तुमिच्छति। अतः अवकाशाय प्राचार्यं प्रति संस्कृतभाषया प्रार्थनापत्रं लिखतु। [1+2+1=4]

***अथवा***

भवान् बस्तरनगरे स्थितः मयङ्कः। भवतः मित्रं नरेशः मनहरे बालोद नगरे वसति। तं परीक्षायां सफलतायै वर्धापनं-पत्रं कोष्ठक प्रदत्त पदानां सहायतया लिखत—

(प्रसन्नता, प्राप्स्यसि, नमस्ते, वर्धापनं, अत्रकुशलं, बालोदतः, सफलतां, अपश्यम्)

स्थानम् (*i*) ---------

दिनाङ्कः 07-11-2021

तव अभिन्नहृदयं मित्रम् ा: मनहरे

मयङ्कः

(*iii*) --------- तत्रास्तु। अद्यैव तव परिणामः आगतः। तव (*iv*) --------- ज्ञात्वा मम मनसि महती (*v*) --------- जाता यदा अहं तव नाम योग्यता सूचौ (*vi*) ---------। त्वया सप्तशतम् अङ्काः प्राप्ताः। त्वं निश्चितरूपेण (*vii*) ---------। त्वया परिवारस्य विद्यालयस्य च नाम उज्ज्वलीकृतम्।

अस्याम् उज्ज्वल सफलतायाम् अहं तुभ्यं हार्दिकं (*viii*) --------- यच्छामि। उज्ज्वल भविष्याय च कामये। मातृपितृचरणेषु प्रणामः।

तव अभिन्नहृदयं मित्रम्

मयङ्कः

(ब) अधोलिखितम् अपठितांशं पठित्वा निर्देशानुसारेण संस्कृतभाषया उत्तरत—

मातृभूमिः बहुविधैः द्रव्यैः अस्मान् उपकरोति। तस्यै अस्माकमपि कर्तव्यं यत् वयं कायेन, मनसा, वाचा, धनेन च स्वमातृभूमेः उन्नतिं कुर्याम। देशाय अस्माकं देशवासिनां हृदयेषु प्रेम भवेत्। मातृभूमिं प्रति सम्मानं भवेत् अतएव कथितम्—''जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।''

*प्रश्ना:* [1×2=2]

(क) एकपदेन उत्तरत—

(*i*) का अस्मान् उपकरोति?

(*ii*) मातृभूमिं प्रति किं भवेत्?

(ख) पूर्णवाक्येन उत्तरत—

(*i*) मातृभूम्यै अस्माकं किं कर्तव्यम् अस्ति? [2]

***अथवा***

**गद्यांशस्य सारांशं संस्कृतभाषया लिखत।**

**प्रश्न-18** द्वादशवाक्येषु संस्कृतभाषया निबन्धलेखनं कुरुत (कोऽपि **एकः**)— [½×12=6]

(*i*) सुभाषचन्द्रः

(*ii*) पर्यावरणम्

(*iii*) महाकविः कालिदासः

(*iv*) सदाचारः